Brain International School
Vikas Puri, New Delhi

## अभ्यास पत्र 2

**विषय ः संस्कृत** **कक्षा दश** **मई ,2025**

**प्रश्न 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

दक्षिणभारते सागर-मध्ये एकं लघुद्वीपं वर्तते। तस्मिन् द्वीपे सागरतरङ्गैः क्षाल्यमानं प्राचीनं नगरं कन्याकुमारी इति अस्ति। एषा कन्याकुमारी त्रयाणां सागराणां सङ्गमस्थली। समुद्रजले प्रतिबिम्बितं सूर्योदयस्य दृश्यम् अद्भुतम् एव। सूर्यस्य क्रमशः अरुणा पीता धवला च शोभा दर्शकान् मन्त्रमुग्धान् करोति। सागरस्य लहरीभिः क्षिप्तानां चित्र-विचित्रवर्णानां शुक्तीनां वृष्टिः इव भवति। जलधितटे स्थितैः नारिकेल-कदली पादपैः परिवृता इव एषा नगरी। एकदा स्वामिविवेकानन्दः समुद्रजले स्थितायाम् एकस्यां बृहत्-शिलायाम् उपविष्टः त्रीणि दिनानि ध्यानमग्नः जातः। एतस्यां शिलायाम् एव अधुना विवेकानन्दकेन्द्रं विकसितम् अस्ति। अत्र आगत्य साधकाः ध्यानं साधनां च कृत्वा जीवनं सफलं कुर्वन्ति।

**उपरिदत्ताम् अनुच्छेदं पठित्वा अधोलिखितप्रश्नान् उत्तरत–**

1. त्रयाणां सागराणां संगमस्थलस्य किं नाम? (एकपदेन उत्तरं लिखत)
2. समुद्रजले प्रतिबिम्बितं कस्य दृश्यम् अद्भुतम्? (एकपदेन उत्तरं लिखत)
3. स्वामिविवेकानन्दः कुत्र त्रीणि दिनानि ध्यानमग्नः जातः? (पूर्णवाक्येन उत्तरं लिखत)
4. वाक्यद्वयं योजयत–अत्र साधकाः आगच्छन्ति, साधकाः ध्यानं कुर्वन्ति?
5. "दक्षिणभारते **सागरमध्ये** एकं लघुद्वीपं वर्तते।" स्थूलाक्षरं पदमाश्रित्य प्रश्ननिर्माणं कुर्वन्तु।
6. रिक्तस्थानं पूरयत–
   एतस्यां शिलायाम् एव अधुना .................. विकसितम् अस्ति।
7. सागरस्य लहरीभिः **क्षिप्तानां शुक्तीनां** वृष्टिः इव भवति। अत्र स्थूलपदयोः किं विशेषणपदम्?
8. अस्य अनुच्छेदस्य शीर्षकं लिखत।

**मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्)**

(i) ............ भवता मृणालपटली भुक्ता।

(ii) अस्माकं परीक्षा ........ अस्ति।

(iii) ............ विद्यालये कार्यक्रमः आसीत्।

(iv) मां विहाय कथमन्यः कः ............ राजा भवितुम् अर्हति?

**मञ्जूषा**

| अद्य, ह्यः, अपि, यत्र |
|---|



**मंजूषा-** धावन्ति, प्रसन्नाः, सन्ति, हस्तौ, मेलयित्वा, कन्या, वेशभूषां, धारयन्ति, अस्ति, हसन्ति।

**अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्)**

(i) **त्वं** सर्वे एव मे प्रियाः?

(क) युवाम् (ख) यूयम्

(ग) सः (घ) तौ

(ii) महर्षिवाल्मीकिः उपनयन-**उपदेशस्य** आवयोः गुरुः अस्ति।

(क) उपदेशेन (ख) उपदेशाय

(ग) उपदेशयोः (घ) उपदेशान्

(iii) सा कुपिता एवं **भणसि**।

(क) भणतः (ख) भणामि

(ग) भणति (घ) भणन्ति